# संस्कृत-वार्ताः

**दिनाङ्क :- 28.09.2024** **सायम् - 06:20**

## आदौ-मुख्यवार्ताः

- प्रधानमन्त्री नरेन्द्रमोदी श्वः पूर्वाह्णे एकादशवादने स्वीय "मन की बात" इति कार्यक्रमे देशवासिभिः साकं विचार-विनिमयं करिष्यति।
- प्रधानमंत्री नरेन्द्रमोदी अवदत् यत्, चतुर्दशाधिकद्विसहस्र-तमे वर्षे तस्य प्रशासनेन 'एकं पदं, एकं निवृत्तिवेतनम्' इतीदं समारब्धम्। एतदर्थं साम्प्रतं विंशतिसहस्रकोट्यधिकैकलक्षं यावत् राशिः आवण्टिता।
- विदेशमन्त्री सुब्रह्मण्यम् जयशंकरः अद्य न्यूयॉर्के संयुक्त-राष्ट्र-महासभायाः ऊनाशीति-तमं सत्रं संबोधयिष्यति।
- संयुक्त-राष्ट्र-महासभायां पाकिस्तानस्य प्रधानमन्त्रिणा शहबाज-शरीफेण कृतं जम्मू-कश्मीर-विषयकम् उल्लेखम् अभिलक्ष्य भारतेन पाकिस्तानं कटुवालोचितम्।
- कानपुरस्य ग्रीन-पार्कइत्याख्ये क्रिकेट्क्रीडाङ्गणे भारत-बाङ्ग्लादेशयोर्मध्ये जायमाना द्वितीया अन्तिमा च क्रिकेट-निकषस्पर्धा अद्य द्वितीयदिवसेऽपि वृष्टिकारणेन बाधिता।

## अथ वार्ताः विस्तरेण

### मन की बात संस्करणं

प्रधानमन्त्री नरेन्द्रमोदी श्वः पूर्वाह्णे एकादशवादने स्वीये "मन की बात" इत्यस्मिन् कार्यक्रमे देशवासिभिः साकं विचार-विनिमयं करिष्यति। "मन की बात" इति मासिक-कार्यक्रमस्य इदं चतुर्दशाधिकैकशतं संस्करणं भविष्यति। अस्य कार्यक्रमस्य प्रसारणं आकाशवाण्याः दूरदर्शनस्य च सर्वाभिः वाहिनिभिः प्रसारयिष्यते। अयं कार्यक्रमः आकाशवाणी-दूरदर्शन-प्रधानमन्त्रि-कार्यालय-सूचनाप्रसारण-मन्त्रालय, इत्येतेषां यूट्यूब-वाहिनीष्वपि द्रष्टुं शक्यते इति। प्रधानमन्त्रिणः सम्बोधनानन्तरं अनुक्षणं अयं कार्यक्रमः क्षेत्रीय-भाषास्वपि श्रोतुं शक्यते। क्षेत्रीय-भाषासु अस्य पुनः प्रसारणं भविष्यति।

### जम्मू-कश्मीरः

जम्मू-कश्मीरे भाजपेतिदलस्य वरिष्ठो नेता प्रधानमन्त्री नरेन्द्रमोदी च अद्य समभाषयत् यत् जम्मू-कश्मीरस्य जनाः शान्तिं, स्वसंतानेभ्यः उत्तमं भविष्यं च इच्छन्ति इति। जम्मू-नगरे नैर्वाचानिकजनसमारोहं सम्बोधयन् असौ अघोषयत् यत् विधानसभा-निर्वाचनस्य अन्तिमयोः चरणयोः महत् मतदानम् अस्य प्रमाणम् अस्ति इति। अत्रावसरे श्रीमोदी न्यगादीत् यत्, काङ्ग्रेसदलं कदापि तेषाम् आदरं कर्तुं न शक्नोति ये देशाय म्रियन्ते। अयमस्ति काङ्ग्रेस्-दलस्य पक्षः , यः अस्माकं सैन्यपरिवारान् चतुर्दशकान् यावत् 'एकं पदं, एकं निवृत्तिवेतनम्' इति उत्कण्ठयत्। श्रीमोदी अवदत् यत्, चतुर्दशाधिकद्वि-सहस्र तमे वर्षे तस्य सर्वकारस्य निर्माणानन्तरं ओ. आर्. ओ. पी. इतीदं कार्यान्वयत् इति। असौ अग्रे ख्यापितवान् यत्, अद्यावधि सैन्यपरिवारेभ्यः विंशतिसहस्रकोट्यधिकैकलक्षं धनं प्रदत्तम् अस्ति। षोडशाधिकद्वि सहस्रतमे तमे वर्षे अस्मिन् दिने एव भारतं पाकिस्तानं विरुद्ध्य सर्जिकल्-स्ट्राइक् इति भीषणाक्रमणम् अकरोत् इति प्रधानमन्त्रिणा स्मृतम् । अवधेयं वर्तते यत् जम्मू-कश्मीर्-राज्ये अन्तिम-चरणस्य मतदानं मङ्गलवासरे चत्वारिंशत् विधानसभासानानां कृते भविष्यति।

### राष्ट्रपतिपदासीना द्रौपदीमुर्मुः

राष्ट्रपतिपदासीना द्रौपदीमुर्मू: सम्भाषितवती यत् सत्यं भाषणेन विधि-बन्धुत्वम् अधिकशक्तियुतं भवतीति । हैदराबाद्-नगरे नालसार - विश्वविद्यालयस्य एक- विंशतितमां दीक्षान्तसभां सम्बोधयन्ती राष्ट्रपतिः उपेक्षितवर्गानां कृते सामाजिक-न्यायस्य कृते कार्यस्य निष्पादन-आवश्यकतां सबलतया प्रतिपादितवती। अनया उत्तमप्रदर्शनार्थं बालिकानां प्रशंसापि कृता तथा च महिला-शक्तीकरणार्थं कार्यं कर्तुम् ताः समाहूताः । महिला: विरुध्य कठोराचरणस्य विषये चिन्तां प्रकटयन्ती सा अवोचत् यत्, अत्याचारस्य विरुद्धं सर्वैः मिलित्वा कार्यं करणीयमिति । छात्रैः राष्ट्रियलक्ष्याणि साधयितुं कार्यं कर्तव्यमिति राष्ट्रपतिः निगदितवती । राष्ट्रपतिः शैक्षणिकक्षेत्रे उत्कृष्टतां प्राप्तवद्भ्य: छात्रेभ्य: स्वर्णपदकं प्राददात्।

**विराम:**

**संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रम: आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।**

**जयशंकर:-बिम्सटेक्-उपवेशनम्**

विदेशमन्त्री सुब्रह्मण्यम् जयशंकर: अद्य न्यूयॉर्के संयुक्त-राष्ट्र-महासभाया: ऊनाशीति-तमं सत्रं संबोधयिष्यति। विदेशमन्त्री अस्मिन् सत्रे भारतीय-प्रतिनिधि-मण्डलस्य नेतृत्वं करोति।

**भारतम्-प्रतिक्रिया**

संयुक्त-राष्ट्र-महासभायां पाकिस्तानस्य प्रधानमन्त्रिणा शहबाज-शरीफेण कृतं जम्मू-कश्मीर-विषयकम् उल्लेखम् अभिलक्ष्य भारतेन पाकिस्तानं कट्वालोचितम्। अनेन उक्तं यत् सैन्य-शासनाय, आतङ्कवादाय, मादकद्रव्याणां व्यापाराय, अन्ताराष्ट्रियापराधेभ्य: च कुत्सितेन पाकिस्तान-सदृशेन देशेन विश्वस्य बृहत्तम-लोकतन्त्रस्य आलोचनां कृत्वा महान् दुस्साहस कृतोऽस्ति। संयुक्त-राष्ट्र-महासभायाम् एकस्मिन् सत्रे सम्बोधनावसरे भारतीया कूटनीतिज्ञा भाविका-मङ्गलानन्दन: उक्तवती यत् भारतस्य अविभाज्ये अभिन्ने च अङ्गे जम्मू-कश्मीरे निर्वाचनानि प्रबाधितुं पाकिस्तानेन अनारतम् आतङ्कवादस्य प्रयोग: कृत:।

**प्रधानमन्त्री-गृहमन्त्री-अमितशाह:**

प्रधानमन्त्री नरेन्द्र मोदी गृहमन्त्री अमितशाह: च अद्य स्वतन्त्रता-संग्रामस्य वीरभटाय भगतसिंहवर्याय तस्य जन्मजयन्त्यवसरे श्रद्धाञ्जलिं समार्पयताम्। एकस्मिन् सामाजिके सञ्जालीये सन्देशे श्रीमोदिना भगतसिंहवर्याय नमोवाचं समर्पयता लिखितं यत् एष: वीरजन: मातृभूमे: रक्षणार्थं तस्या: आत्मसम्मानं संरक्षयितुं च जीवनत्यागं कृतवान्। गृहमन्त्री अमितशाह: अपि प्रावोचत् यत् क्रान्तिवीर: एष: भगतसिंहवर्य: न केवलम् आङ्ग्लशासकान् विरूध्य सङ्घर्षं कृतवान् आसीत् अपितु देशस्य स्वतन्त्रतायै उत्तमभविष्याय च स्वीयप्राणाहुति: प्रदत्तासीत्। परिणामत: समग्रे राष्ट्रे स्वतन्त्रताप्राप्तये एका सकारात्मकी लहरी प्रसारिता।

**प्रधानमन्त्री-लतामङ्गेशकरवर्या**

प्रधानमन्त्री नरेन्द्रमोदी अद्य प्रोक्तवान् यत् लतामङ्गेशकरवर्या स्वगीतमाध्यमेन जनानां मनसि हृदि च सर्वदा जीवितास्ति। लतामङ्गेशकरवर्याया: जन्मजयन्त्यवसरे तस्यै श्रद्धाञ्जलिं समर्पयता श्रीमोदिना कथितं यत् लतामंगेशकरस्य तस्य च मध्ये एकं विशिष्टं बन्धनमासीत्। श्रीमोदिना दैनिके पत्रे एकस्मिन् प्रकाशित: लतामङ्गेशकरवर्याया: भ्रात्रा लिखित: आलेख: विनिमयीकृत:। यस्मिन् उभयो: सौहार्दपूर्ण-सम्बन्धा: लिखितास्सन्ति।

**संयुक्तराष्ट्र-सहभागिता**

अमेरिकादेशेन ईराकसर्वकारेण साकं एकं सन्धिपत्रं हस्ताक्षरैः प्रमाणीकृतं यदनुसारि आगामि-वर्षं यावत् इस्लामिक-स्टेट-समूहेन सह योत्स्यमानायाः अमेरिका- सन्नीतसंयुतेः सैन्याभियानं समापयिष्यते। ह्यः वार्ताहरैः सह सम्भाषमाणाः अमेरिकादेशीयाः अधिकारिणः अकथयन् यत् एतद् अन्तर्गतं ईराक-देशे नियुक्तेभ्यः सैनिकेभ्यः द्विचरणीयं परिवर्तनं भविष्यति यदस्मिन् मासे समारप्स्यते।

**वृष्टिः-बंगालम्**

पर्वतीयक्षेत्रेषु दूआर्स-क्षेत्रे च प्रबल-वृष्टि-कारणात् उत्तरीयबंगालस्य नद्यः सम्प्रति संकटचिह्नम् अतिक्रम्य प्रवहन्ति। भारतर्तु-विभागेन अद्य दार्जिलिंग-जल्पाईगुड़ी-कूचबिहार-जनपदेषु मूसलाधारवृष्टेः सम्भावनाम् अभिलक्ष्य रक्तवार्णिकी संचेतना प्रसारितास्ति।

**मुम्बै-नगरस्य संचेतना**

केन्द्रीय-गुप्तचर-अभिकरणानां पक्षतः सम्भावितस्य भयोत्पादक-आतङ्कि-आक्रमणस्य संचेतनायाः पश्चादेव मुम्बै-नगरस्य आरक्षिबलेन वित्तीय-राजधान्यै संचेतना घोषिता । जनसम्मर्देषु, धार्मिकस्थलेषु, संवेदनशीलस्थानेषु च सुरक्षाव्यवस्थाः वर्धितास्सन्ति। आगामि-नवरात्र-उत्सवस्य दृष्ट्या सिद्धिविनायक-देवालयेन सह लोकप्रियेषु मन्दिरेषु सुरक्षावृद्धिः कृता अस्ति, अतिरिक्त-कर्मचारिणः च नियुक्ताः सन्ति। एतेषां स्थलानां दर्शनार्थं भक्तानां कृते सुरक्षा-नियमावल्यः स्थापिताः सन्ति।

**क्रिकेट-प्रतिस्पर्धा**

कानपुरस्य ग्रीन-पार्कइत्याख्ये क्रिकेट्क्रीडाङ्गणे भारत-बाङ्ग्लादेशयोर्मध्ये जायमाना द्वितीया अन्तिमा च क्रिकेट-निकषस्पर्धा अद्य द्वितीयदिवसेऽपि वृष्टिकारणेन बाधिता। अवधेयं वर्तते यत् भारतं एकं शून्य इत्यङ्केन अग्रत्वं भजते।

**॥ इति वार्ताः॥**